# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| कक्षा –आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् — ३<br>(C.C.- 4.1.2. Old & New ) | |
|---|---|---|
| विषयः – वास्तुशास्त्रम् | | गुणाः – ७० |
| दिनाङ्कः – १०/१०/२०१९ | ग्रन्थःसमराङ्गणसूत्रधारः | समयः –०८.०० तः ११.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां कुरुत। (५)**

(१) देवः स पातु भुवनत्रयसूत्रधारस्त्वां बाालचन्द्रकलिकाङ्कितजूटकोटिः।
एतत् समग्रमपि कारणमन्तरेण कात्स्न्यार्दसूत्रितमसूत्र्यत येन विश्वम्॥

(२) विस्तीर्णासनमासीनं सर्वज्ञमथसंस्मृताः।
आयुर्विश्वकर्माणं चत्वारो मानसाः सुताः॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु। (१०)**

(१) भुवनकोशः।

(२) भूमिपरीक्षा।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत। (५)**

(१) चतुरश्रीकृते क्षेत्रे विभक्ते नवधा ततः।
मध्ये महाद्युतिर्ब्रह्मा विधेयो नवभिः पदैः॥

(२) एकाशीतिपदो यः स्यात् तथा शतपदश्च यः।
चतुः षष्टिपदो यश्च वास्तुरत्र त्रिधोदितः॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु। (१०)**

(१) मर्मवेधः।

(२) चतुः शालाविधानम्।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत। (५)**

(१) यस्य निम्ना भवेद् भूमिर्वाया दक्षिणकास्थला।
वहुदोषं हि तद् वास्तु पुत्रपौत्रविनाशकम्॥

(२) हस्तिनी महिषी चेति द्वे शाले यत्र वेश्मनि।
तत् सिद्धार्थमितिज्ञेयं वित्तसम्पत्तिकारकम्॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

(१) द्विशालगृहलक्षणम्।

(२) त्रिशाललक्षणम्।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत।** **(५)**

(१) चन्द्रताराबलं भर्तुरनुकूलं च शस्यते।
इयं हि सूत्रपाताख्या क्रिया प्रसादकर्मणि॥

(२) द्वारस्य गृहविस्तारैर्हस्ततुल्याङ्गुलैर्भवेत्।
उच्छ्रायः सप्तभिर्युक्तैर्विस्तृतिस्तु तदर्धतः॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

(१) गृहद्रव्यप्रमाणानि।

(२) शयनासनलक्षणम्।

## संयुक्तान्वितिः

**प्रश्नः ९ अधोललिखितेषु केषाश्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** **(१०)**

(१) समराङ्गणसूत्रधारग्रन्थस्य रचनाकारस्य नाम किम्।

(२) विश्वकर्मायाः कति मानससुताः वर्तन्ते।

(३) विश्वकर्मायाः चतुर्णां पुत्राणां नामानि लिखत।

(४) क्षितेः परिधिमानं लिखत (ग्रन्थानुसारेण)

(५) एकस्मिन् अङ्गुलात्मकमाने काति यवोदराः भवन्ति ?

(६) एकस्मिन् हस्ते कति अङ्गुलानि भवन्ति ?

(७) गृहे ब्रह्मस्थानं कुत्र भवति ?

(८) गृहे देवस्थानं कुत्र भवति ?

(९) मर्मस्थानानां परिपीडनात् किमं फलं भवति ?

(१०) वेश्मः इत्यस्य कोऽर्थः ?

(११) प्रसादः इत्यस्य आशयः कः ?

(१२) कति आयाः भवन्ति ?

(१३) 'एकशालगृहम् ' अर्थात् किम् ?

(१४) दक्षिणभागे निम्ना भूमेः फलं लिखत।

(१५) सामान्यतः द्वारोच्छ्रितिः मानं लिखत।

--००--